# सम्भाषणं पठित्वा जीवनचरितं लिखत।

(स्वातितिरुनाल् महाराजं कश्चित् ब्राह्मणः मिलितवान्। तदा प्रवृत्तं सङ्कल्पितसम्भाषणम् अधः दत्तमस्ति)

ब्राह्मणः : (प्रविश्य) अये महात्मन्। नमो नमः।

स्वातिमहाराजः : अये भूसुरश्रेष्ठ! आगम्यताम्।

ब्राह्मणः : महाराजन्! भवान् 1813 तमे वर्षे जनिं लब्धवान् खलु। भवतः गर्भश्रीमान् इति नाम कथमभवत्।

स्वातिराजः : जन्मनः पूर्वमेव राज्याधिकारो मया स्वायत्तीकृतः। अतः तन्नाम अलभत।

ब्राह्मणः : भवान् वाग्गेयकारः खलु। भवतः इष्टतमः देवः कः?

स्वातिः : श्रीपद्मनाभः एव। तमधिकृत्य पद्मनाभशतकम्, भक्तिमञ्जरी, स्यानन्दूरपुरवर्णनप्रबन्धं च रचितवान्। उत्सवप्रबन्धं, कचेलोपाख्यानं च अन्ये ग्रन्थाः।

ब्राह्मणः : सारसाक्ष परिपालय...., भावयामि रघुरामं....., इत्यदीनि कीर्त्तनानि भवता रचितानि खलु।

वातिराजः : आम्। मयैव कृतानि इमानि।

ब्राह्मणः : इरयिम्मन्तम्पी भवतः सभापण्डितः इति ज्ञायते।

वातिः : आम्। स मम सदसि वर्तमानः प्रसिद्धः वाग्गेयकारः।

ब्राह्मणः : महाराज! भवतः श्रमेण वञ्चिराजवंशस्य ख्यातिः वर्धितो भूयात्।

वातिराजः : शुभवचनेषु प्रीतोऽस्मि।

ब्राह्मणः : अनुगृहीतोऽस्मि।

# जीवनचरितरेखां पूरयत ।

नाम - ..................................................................................... /

जन्म - ................................................................................. /

नामान्तरम् - ................................................................................... /

कृतयः - ........................................................................................................... /

प्रसिद्धानि कीर्त्तनानि - ................................................................................... /

ततः जीवनचरितं लिखत ।